श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ अष्टनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टनवतितमः सर्गः ॥

## अङ्गदेन महापार्श्वस्य वधः

महोदरे तु निहते महापार्श्वो महाबलः।
सुग्रीवेण समीक्ष्याथ क्रोधात्संरक्तलोचनः॥ **6.98.1** ॥

अङ्गदस्य चमूं भीमां क्षोभयामास मार्गणैः।
स वानराणां मुख्यानामुत्तमाङ्गानि राक्षसः॥ **6.98.2** ॥

पातयामास कायेभ्यः फलं वृन्तादिवानिलः।
केषाञ्चिदिषुभिर्बाहूंश्चिच्छेदाथ स राक्षसः॥ **6.98.3** ॥

वानराणां सुसंरब्धः पार्श्वं केषाञ्चिदाक्षिपत्।
तेऽर्दिता बाणवर्षेण महापार्श्वेन वानराः॥ **6.98.4** ॥

विषादविमुखाः सर्वे बभूवुर्गतचेतसः।
निशम्य बलमुद्विग्नमङ्गदो राक्षसार्दितम्॥ **6.98.5** ॥

वेगं चक्रे महावेगः समुद्र इव पर्वसु।
आयसं परिघं गृह्य सूर्यरश्मिसमप्रभम्॥ **6.98.6** ॥

समरे वानरश्रेष्ठो महापार्श्वे न्यपातयत्।
स तु तेन प्रहारेण महापार्श्वो विचेतनः॥ **6.98.7** ॥

ससूतः स्यन्दनात् तस्माद् विसंज्ञश्चापतद् भुवि।
तस्यर्क्षराजस्तेजस्वी नीलाञ्जनचयोपमः॥ **6.98.8** ॥

निष्पत्य सुमहावीर्यः स्वयूथान्मेघसन्निभात्।
प्रगृह्य गिरिशृङ्गाभां क्रुद्धः स विपुलां शिलाम्॥ **6.98.9** ॥

अश्वाञ्जघान तरसा बभञ्ज स्यन्दनं च तम्।
मुहूर्ताल्लब्धसंज्ञस्तु महापार्श्वो महाबलः॥ **6.98.10** ॥

अङ्गदं बहुभिर्बाणैर्भूयस्तं प्रत्यविध्यत।
जाम्बवन्तं त्रिभिर्बाणैराजघान स्तनान्तरे॥ **6.98.11** ॥

ऋक्षराजं गवाक्षं च जघान बहुभिः शरैः।
गवाक्षं जाम्बवन्तं च स दृष्ट्वा शरपीडितौ॥ **6.98.12** ॥

जग्राह परिघं घोरमङ्गदः क्रोधमूर्च्छितः।
तस्याङ्गदः सरोषाक्षो राक्षसस्य तमायसम्॥ **6.98.13** ॥

दूरस्थितस्य परिघं रविरश्मिसमप्रभम्।
द्वाभ्यां भुजाभ्यां सङ्गृह्य भ्रामयित्वा च वेगवत्॥ **6.98.14** ॥

महापार्श्वस्य चिक्षेप वधार्थं वालिनः सुतः।
स तु क्षिप्तो बलवता परिघस्तस्य रक्षसः॥ **6.98.15** ॥

धनुश्च सशरं हस्ताच्छिरस्त्राणं च पातयत्।
तं समासाद्य वेगेन वालिपुत्रः प्रतापवान्॥ **6.98.16** ॥

तलेनाभ्यहनत् क्रुद्धः कर्णमूले सकुण्डले।
स तु क्रुद्धो महावेगो महापार्श्वो महाद्युतिः॥ **6.98.17** ॥

करेणैकेन जग्राह सुमहान्तं परश्वधम्।
तं तैलधौतं विमलं शैलसारमयं दृढम्॥ **6.98.18** ॥

राक्षसः परमक्रुद्धो वालिपुत्रे न्यपातयत्।
तेन वामांसफलके भृशं प्रत्यवपातितम्॥ **6.98.19** ॥

अङ्गदो मोक्षयामास सरोषः स परश्वधम्।
स वीरो वज्रसङ्काशमङ्गदो मुष्टिमात्मनः॥ **6.98.20** ॥

संवर्तयत् सुसङ्क्रुद्धः पितुस्तुल्यपराक्रमः।
राक्षसस्य स्तनाभ्याशे मर्मज्ञो हृदयं प्रति॥ **6.98.21** ॥

इन्द्राशनिसमस्पर्शं स मुष्टिं विन्यपातयत्।
तेन तस्य निपातेन राक्षसस्य महामृधे॥ **6.98.22** ॥

पफाल हृदयं चास्य स पपात हतो भुवि।
तस्मिन् विनिहते भूमौ तत् सैन्यं सम्प्रचुक्षुभे॥ **6.98.23** ॥

अभवच्च महान् क्रोधः समरे रावणस्य तु।
वानराणां प्रहृष्टानां सिंहनादः सुपुष्कलः॥ **6.98.24** ॥

स्फोटयन्निव शब्देन लङ्कां साट्टालगोपुराम्।
सहेन्द्रेणेव देवानां नादः समभवन्महान्॥ **6.98.25** ॥

अथेन्द्रशत्रुस्त्रिदशालयानां
वनौकसां चैव महाप्रणादम्।
श्रुत्वा सरोषं युधि राक्षसेन्द्रः
पुनश्च युद्धाभिमुखोऽवतस्थे॥ **6.98.26** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टनवतितमः सर्गः॥